# श्रीसुरसरस्वतीसभा शृङ्गेरि

## तुरीया परीक्षा

## प्रथमपत्रिका

दिनाङ्कः - 01-09-2024 अङ्काः - 100

पूर्वाह्ने – 10:00 वादनतः 1:00 वादनपर्यन्तम् समयः – घण्टात्रयम्

सूचना – सर्वाणि उत्तराणि संस्कृतेन एव लेखनीयानि

**1 पञ्चानाम् एकवाक्येन उत्तरं लिखत । 5**

१. राजसु का पूज्यते ?

२. नलः कं जग्राह ?

३. श्रीशङ्कराचार्यस्य पिता कः ?

४. 'रघोरुदारामपि गां निशम्य' इत्यत्र गाम् इत्यस्य कः अर्थः ?

५. श्रीमद्रामायणं किमिति प्रसिद्धम् ?

६. श्रीशङ्कराचार्यः कयोः उपनिषदोः स्वभाष्यस्य वार्तिकं विधातुं सुरेश्वराचार्यमादिदेश ?

७. मातलिः कः ?

८. शन्तनुः कस्य नगरस्य राजा आसीत् ?

**2 पञ्चानां त्रिचतुरैः वाक्यैः उत्तरं लिखत । 10**

१. सहस्रानीकः कः ? तं देवेन्द्रः किमुवाच ?

२. पुत्रीयन् पाण्डुः कुन्तीं किमवोचत् ?

३. कौत्सः कः ? किमर्थं सः रघुं प्रपेदे ?

४. भीष्मेण स्वपरिचयं पृष्टः द्रोणः तं किमवदत् ?

५. सुरेश्वरः वार्तिकं रचयितुकामो भगवत्पादं किमभ्यर्थयामास ?

६. शिवगुरुः शङ्करैकभावं कथं कलयति ? कथं च बहुनियमान् समञ्चति स्म ?

७. स्वगुणेषु प्रत्ययः कदा भवति इति शिवस्तुतौ उक्तदिशा विवृणुत ।

**3 द्वयोः विस्तरेण (सप्ताष्टैर्वाक्यैः) उत्तरं लिखत । 8**

१. रघोः औदार्यं वर्णयत ।

२. भगवता वेदव्यासेन उक्तं द्रौपद्याः पूर्ववृत्तान्तं वर्णयत ।

३. पाण्डुशापवृत्तान्तं विवृणुत ।

४. दमयन्तीस्वयंवरदिनस्य वृत्तान्तं वर्णयत ।

**4 वाक्यत्रयं सप्रसङ्गं विवृणुत । 9**

१. राजन्! तव शापस्य विमोचनकालः सन्निहितः ।

२. प्रत्यपद्यत च सद्य एव यौवनम् ।

३. अभ्युपपद्यस्वाधुनापि मम मैत्रीम् ।

४. शरद्घनं नार्दति चातकोऽपि ।

५. ज्योतिर्मयं विचिन्वन्ति योगिनस्त्वां विमुक्तये ।

**5 द्वयोः भावं विशदयत । 8**

१. कालेऽस्मिन् हरिणमृगादनादिसत्त्वाः सञ्चेरुः परिहृतजातिवैरभावाः ।
वृक्षाद्याः कुसुमफलान्विता अभूवन् पेतुर्द्वैत्यभिमतपुस्तकानि हस्तात् ॥

२. गुर्वर्थमर्थी श्रुतपारदृश्वा रघोः सकाशादनवाप्य कामम् ।
गतो वदान्यान्तरमित्ययं मे मा भूत् परीवादनवावतारः ॥

३. हंसो यथा राजतपञ्जरस्थः सिंहो यथा मन्दरकन्दरस्थः ।
वीरो यथा गर्वितकुञ्जरस्थश्चन्द्रोऽपि बभ्राज तथाम्बरस्थः ॥

४. भवन्ति नम्रास्तरवः फलोद्गमैः नवाम्बुभिर्दूरविलम्बिनो घनाः ।
अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभाव एवैष परोपकारिणाम् ॥

**6 श्लोकमेकं पूर्णं लिखत । 4**

१. यावत् .................. कीदृशः ॥

२. आयुः .................. प्राणिनाम् ॥

**7 एकस्य कवेः देशकालकृतिमहत्त्वादीनां विषये लिखत । 4**

१. कालिदासः २. लक्ष्मणशास्त्री

**8 एकस्य लघुटिप्पणीं लिखत ।** **4**

१. गिरिकृतसेवा २. एकचक्रम्

**9 चत्वारि पदानि वाक्ये योजयत ।** **4**

१. विघ्नैः २. श्रूयते ३. प्रणिपत्य
४. निवासिनौ ५. पाराशर्यः ६. शीतांशुः

**10 चतुर्णां रूपाणि विवेचयत ।** 4

१. अर्हन् २. दुश्शासने ३. जिष्णोः
४. निरीक्ष्य ५. दधार ६. भवन्तम्

**11 चतुर्णां पर्यायपदानि लिखत ।** **4**

१. विनीय २. पथि ३. अम्बरम्
४. सुदती ५. ओघः ६. चकमे

**12 चतुर्णां विग्रहवाक्यं विलिख्य समासनाम लिखत ।** **4**

१. निद्रालस्ये २. विशुद्धचेताः ३. शतश्लोकी
४. निश्शेषविश्राणितकोशजातः ५. स्वहस्तधृतम् ६. कार्यदक्षः

**13 चतुर्णां सन्धिं विभज्य नाम लिखत ।** **4**

१. आराधयन्नम्बिकाम् २. त्वय्यशुभम् ३. पुत्रांस्ते
४ सान्वशितवती ५. अप्रबुद्ध एव ६. धीस्तदा

**14 द्वयोः तत्तल्लकारे पुरुषत्रये सर्वाणि रूपाणि लिखत ।** **6**

१. निनाय २. त्रायस्व ३. भव ४. यतिष्ये

**15 द्वयोः व्याकरणविशेषं लिखत ।** **4**

१. हैडिम्बेयः २. उपतस्थिरे ३. अर्घ्यम् ४. व्यजयत

**16 समासमेकं सलक्षणं विशदयत ।** **4**

१. अव्ययीभावसमासः २. द्वन्द्वसमासः

**17 चतुर्थं पदं लिखत ।** **4**

१. भर्तृहरिः – नीतिशतकम् :: वाल्मीकिः – ________

२. शतानीकः – सहस्रानीकः :: शन्तनुः – ________

३. चित्राङ्गदा – कुन्ती :: अम्बिका – ________

४. पञ्चरात्रम् – द्विगुसमासः :: पुण्डरीकाक्षः – ________

**18 इतरवचनानि लिखत ।** **4**

१. ______ ______ अधीतिनाम् ।

२. महात्मन्! ______ ______ ।

३. ______ स्त्रीपुंसौ ______ ।

४. दृश्यते ______ ______ ।

**19 रिक्तस्थानानि पूरयत ।** **4**

१. लोकवृत्तसाक्षिणो देवाः __________ मे पतिं दिशन्तु ।

२. विराजतेऽद्यापि सा __________ ।

३. नृपोऽर्थिकामात् __________ च ।

४. अनन्यगतिकं मां पुन्नाम्नो ________ त्रायस्व ।

**20 प्रयोगपरिवर्तनं कुरुत ।** **2**

१. ब्राह्मणः स्वप्ने माम् अवबोधितवान् ।

२. पञ्च पाण्डवाः अजायन्त ।

------------------------